.. Natya Shastra Chapter 26..

॥ नाट्यशास्त्रम् अध्यायः २६ ॥

Document Information

Text title : naaTyashaastra adhyaaya 26
File name : natya26.itx
Category : natyashastra
Location : doc_z_misc_major_works
Author : Sage Bharata
Language : Sanskrit
Subject : philosophy/hinduism/culture/Dance/Drama
Transliterated by : dpadmakar at hotmail.com
Proofread by : dpadmakar at hotmail.com
Latest update : November 23, 2002
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

॥ नाट्यशास्त्रम् अध्याय २६ ॥

॥ श्रीरस्तु ॥

भरतमुनिप्रणीतं नाट्यशास्त्रम्
षड्विंशोऽध्यायः
अनुरूपा विरूपा च तथा रूपानुरूपिणी ।
त्रिप्रकारेह पात्राणां प्रकृतिश्च विभाविता ॥ १॥

नानावस्थाक्रियोपेता भूमिका प्रकृतिस्तथा ।
भृशमुद्योतयेन्नाट्यं स्वभावकरणाश्रयम् ॥ २॥

बहुबाहूबहुमुखास्तथा च विकृताननाः ।
पशुश्वापदवक्राश्च खरोष्ट्राश्च गजाननाः ॥ ३॥

एते चान्ये च बहवो नानारूपा भवन्ति ये ।
आचार्येण तु ते कार्या मृत्काष्ठजतुचर्मभिः ॥ ४॥

स्वाभाविकेन रूपेन प्रविशेद्रङ्गमण्डलम् ।
आत्मरूपमवच्छाद्य वर्णकैर्भूषणैरपि ॥ ५॥

यादृशं यस्य यद्रूपं प्रकृत्या तत्र तादृशम् ॥

वयोवेषानुरूपेण प्रयोज्यं नाट्यकर्मणि ॥ ६॥

यथा जीवत्स्वभावं हि परित्यज्यान्यदेहिकम् ।
परभावं प्रकुरुते परभावं समाश्रितः ॥ ७॥

एवं बुधः परंभावं सोऽस्मीति मनसा स्मरन् ।
येषां वागङ्गलीलाभिश्चेष्टाभिस्तु समाचरेत् ॥ ८॥

सुकुमारप्रयोगो यो राज्ञामामोदसंभवः ।
श्रृङ्गाररसमासाद्य तन्नारीषु प्रयोजयेत् ॥ ९॥

युद्धोद्धताविद्धकृता संरंभारभटाश्च ये ।
न ते स्त्रीभिः प्रयोक्तव्याः योक्तव्याः पुरुषेषु ते ॥ १०॥

अनुद्धटमसंभ्रान्तमनाविद्धाङ्गचेष्टितम् ।
लयतालकलापातप्रमाणनियताक्षरम् ॥ ११॥

सुविभक्तपदालापमनिष्ठुरमकाहलम् ।
ईदृशं यद्भवेन्नाट्यं नारीभिश्च प्रयोजयेत् ॥ १२॥

एवं कार्यं प्रयोगज्ञैर्भूमिकाविनिवेशनम् ।
स्त्रियो हि स्त्रीगतो भावः पौरुषः पुरुषस्यच ॥ १३॥

यथा वयो यथावस्थमनुरूपेति सा स्मृता ।
पुरुषः स्त्रीकृतं भावं रूपात्प्रकुरुते तु यः ॥ १४॥

रूपानुरूपा सा ज्ञेया प्रयोगे प्रकृतिर्बुधः ।
छन्दतः पौरुषीं भूमिं स्त्री कुर्यादनुरूपतः ॥ १५॥

न परस्परचेष्टासु कार्यौ स्थविरबालिशौ ।
पाठ्यप्रयोगे पुरुषाः प्रयोक्तव्या हि संस्कृते ॥ १६॥

स्त्रीणां स्वभावमधुराः कण्ठाः पुंसां तु बलवन्तः ।
यद्यपि पुरुषो विद्यात् गीतविधानं च लक्षणोपेतम् ॥ १७॥

माधुर्यगुणविहीनं शोभां जनयेन्न तद्गीतम् ।
यत्र स्त्रीणां पाठ्याद्गुणैर्नराणां च कण्ठमाधुर्यम् ॥ १८॥

प्रकृतिविपर्ययजनितौ विज्ञेयौ तावलङ्कारौ ।
प्रायेण देवपार्थिवसेनापतिमुख्यपुरुषभवनेषु ॥ १९॥

स्त्रीजनकृताः प्रयोगा भवन्ति पुरुषस्वभावेन ।
रम्भोर्वशीप्रभृतिषु स्वर्गे नाट्यं प्रतिष्ठितम् ॥ २०॥

तथैव मानुषे लोके राज्ञामन्तःपुरेष्विह ।
उपदेष्टव्यमाचार्यैः प्रयत्नेनाङ्गनाजने ॥ २१॥

न स्वयं भूमिकाभ्यासो बुधैः कार्यस्तु नाटके ।
स्त्रीषु योज्यः प्रयत्नेन प्रयोगः पुरुषाश्रयः ॥ २२॥

यस्मात्स्वभावोपगतो विलासः स्त्रीषु विद्यते ।
तस्मात्स्वभावमधुरमङ्गं सुलभसौष्ठवम् ॥ २३॥

ललितं सौष्ठवं यच्च सोऽलङ्कारः परो मतः ।
प्रयोगो द्विविधश्चैव विज्ञेयो नाटकाश्रयः ॥ २४॥

सुकुमारस्तथाविद्धो नानाभावरसाश्रयः ।
नाटकं सप्रकरणं भाणो वीथ्यङ्क एव च ॥ २५॥

ज्ञेयानि सुकुमाराणि मानुषैराश्रितानि तु ।
सुकुमारप्रयोगोऽयं राज्ञामामोदकारकः ॥ २६॥

श्रृङ्गाररसमासाद्य स्त्रीणां तत्तु प्रयोजयेत् ।
युद्धोद्धताविद्धकृतासंरंभारभटाश्च ये ॥ २७॥

न ते स्त्रीणां प्रकर्तव्याः कर्तव्याः पुरुषैर्हि ते ।
यथाविद्धाङ्गहारं तु भेद्यभेद्याहवात्मकम् ॥ २८॥

मायेन्द्रजालबहुलं पुस्तनैपथ्यदीपितम् ।
पुरुषप्रायसंचारमल्पस्त्रीकमथोद्धतम् ॥ २९॥

सात्वत्यारभटीइयुक्तं नाट्यमाविद्धसंज्ञितम् ।
डिमः समवकारश्च व्यायोगेहामृगौ तथा ॥ ३०॥

एतान्याविद्धसंज्ञानि विज्ञेयानि प्रयोक्तृभिः ।
एषां प्रयोगः कर्तव्यो देवदानवराक्षसैः ॥ ३१॥

उद्धता ये च पुरुषाः शौर्यवीर्यसमन्विताः ।
योग्यः स च प्रयत्नः कर्तव्यः सततप्रमादेन ॥ ३२॥

न हि योग्यया विना भवति च भावरससौष्ठवं किंचित् ।
संगीतपरिक्लेशो नित्यं प्रमदाजनस्य गुण एव ॥ ३३॥

यन्मधुरकर्कशत्वं लभते नाट्यप्रयोगेण ।
प्रमदाः नाट्यविलासैर्लभते यत् कुसुमैर्विचित्रलावण्यम् ।
कामोपचारकुशला भवन्ति च काम्या विशेषेण ॥३४॥

गीतं वृत्तं तथा वाद्यं प्रस्तारगमनक्रिया ।
शिष्यनिष्पादनं चैव षडाचार्यगुणाः स्मृताः ॥ ३५॥

एतानि पञ्च यो वेत्ति स आचार्यः प्रकीर्तितः ।
ऊहापोहौ मतिश्चैव स्मृतिर्मेधा तथैव च ॥ ३६॥

मेधास्मृतिर्गुणश्लाघारागः संघर्ष एव च ।
उत्साहश्च षडेवैतान् शिष्यस्यापि गुणान् विदुः ॥ ३७॥

एवं कार्यं प्रयोगज्ञैर्नानाभूमिविकल्पनम् ।
अत ऊर्ध्वं प्रवक्ष्यामि सिद्धीनामपि लक्षणम् ॥ ३८॥

इति भारतीये नाट्यशास्त्रे विकृतिविकल्पो
नाम षड्विंशोऽध्यायः ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

.. Natya Shastra Chapter 26..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*